# कारकाङ्कनसूचनाः एवं निर्देशाः

क. रामकृष्णमाचार्यः, शीतल पोकार, देवानन्द शुक्ल, अम्बा कुलकर्णी

June 30, 2011

## 1 पूर्वभूमिका

मानवकृताङ्कनसंग्रहस्य सङ्गणकस्योपयोगेन भाषाविश्लेषणे महत्त्वपूर्णं स्थानमस्ति। वस्तुतः एषः सङ्ग्रहः यन्त्रशिक्षणे एव न, अपि तु नियमाधारितयन्त्रनिर्माणे अपि सहायको भविष्यति। वाक्येषु पदानां परस्परसम्बन्धस्य यन्त्रेण साक्षात् प्राप्तये तत्र स्थितानां विविधसम्बन्धानां अङ्कनम् अनिवार्यमस्ति। अङ्कनकाले एते त्रयः प्रश्नाः अस्माकं सविधे उपस्थापिताः भवन्ति :

1. आर्थिकस्तरे अङ्कनस्य अभिप्रेतः स्तरः कः ?
2. कः सम्बन्धः अङ्कनीयः कः च न ?
3. द्योतकशब्दानां प्रबन्धनं कथम् ?

### 1.1 आर्थिकस्तरे अङ्कनस्य अभिप्रेतः स्तरः कः ?

अधस्तने वाक्ये :-

स्थाली पचति.

इत्यत्र 'स्थाली' एवञ्च 'पचति' अनयोः मध्ये कः सम्बन्धः? किं 'स्थाली' इति 'पचति' इत्यस्य अधिकरणम् उत कर्ता? वास्तविकरूपेण कोऽपि 'स्थाली' इत्यस्य अधिकरणम् इत्यपि अङ्कनं कुर्यात्। आर्थिकस्तरे 'स्थाली' अधिकरणम् एवञ्च शाब्दिकस्तरे 'स्थाली' कर्ता। अत्र द्विधा अङ्कनं भवितुमर्हति। वस्तुतस्तु अधिकरणम् इति अङ्कनं वास्तवजगतः प्रकृतं सम्बन्धं द्योतयेत्। किन्तु कर्ता इति अङ्कनं प्रयुक्तेषु पदेषु निहितानां तथ्यानां साक्षात् प्रकाशनं कुर्यात्। एवञ्च कर्ता इति अङ्कनं शब्दजगतः वास्तविकं स्वरूपं प्रदर्शयेत्। तत्रापि कर्ता इति सम्बन्धस्याङ्कनं प्रत्ययं दृष्ट्वा कर्तुं शक्यते। परन्तु अधिकरणस्याङ्कने पदार्थज्ञानं व्यवहारज्ञानं च आवश्यकम्।

### 1.2 कः सम्बन्धः अङ्कनीयः कः च न ?

रामः दुग्धम् पीत्वा शालाम् गच्छति.

अस्मिन् वाक्ये 'रामः' एवञ्च 'पीत्वा' अनयोः मध्ये सम्बन्धः स्पष्टतया प्रत्ययेन न स्फुट्यते। तस्य अर्थः इत्थं ज्ञायते - गच्छति

इति प्रयोगः कर्तरि अस्ति इति कृत्वा तिप्रत्ययेन कर्तुः अभिहितत्वात् अनभिहिते इति नियमेन रामः इत्यत्र प्रथमा भवति। तन्नाम 'रामः', 'गच्छति' इत्यनयोः कर्ता इति सम्बन्धः साक्षाद् ज्ञायते। परन्तु 'रामः' एवञ्च पीत्वा इत्यत्र प्रत्ययेन सम्बन्धः स्पष्टरूपेण न द्योतितः। अपि तु तत्र 'समानकर्तृकयोः पूर्वकाले' (पा० 3.4.21) इति पाणिनीयसूत्रं वर्तते, येन ज्ञायते यत् समानकर्तृकयोः क्रिययोः पूर्वकाले विद्यमानाद्धातोः त्त्वा-प्रत्ययः भवति। 'गच्छति' इत्यस्य पूर्वकालिकक्रिया 'पीत्वा' इति वर्तते, पूर्वकालिकक्रियायां 'पीत्वा' इत्यत्र समानकर्तृकत्वात् त्त्वा-प्रत्ययः आगतः। अतः अत्र यः 'गच्छति' इत्यस्य कर्ता स एव 'पीत्वा' इत्यस्यापि कर्ता इति तु पार्श्विकबोधेन ज्ञायते, न तु शब्दात्। अस्मिन् स्तरे वयम् एतादृशानां सम्बन्धानाम् अङ्कनं न कुर्मः। अत्र 'पीत्वा' एवं 'गच्छति' इत्यनयोः मध्ये पूर्वकालसम्बन्धः एवञ्च 'रामः' एवं 'गच्छति' इत्यत्र कर्तृसम्बन्धः भवति। तस्मात् स्वाभाविकरूपेण समानकर्तृकयोः पूर्वकाले (पा० 3.4.21) इत्यनेन सूत्रस्य बलात् गच्छति-समानकर्तृत्वेन 'रामः' इति पीत्वा इत्यस्यापि कर्ता भवति।

## 1.3 द्योतकः वाचकः वा

वयं द्वयोः पदयोः मध्ये सम्बन्धस्याङ्कनं कुर्मः। किम् पदम्? 'सुप्तिङन्तम् पदम्' (1.4.14) सुबन्तं तिङन्तं च पदसंज्ञकं भवतः। यथोदाहरणेऽस्मिन् 'गच्छति' इत्यस्य कर्ता 'रामः'।

पदम् वाचकं द्योतकं वा भवितुमर्हति। उदाहरणं पश्यामः।

रामेण सह सीता वनं गच्छति.

वाक्येऽस्मिन् 'सह' इति 'रामेण' एवं 'सीता' इत्यनयोः सम्बन्धस्य अङ्कनं करोति। अत्र 'सह' इति नास्ति वाचकं पदम्, तत् पदं द्योतकं वर्तते। किन्तु व्याकरणदृष्ट्या 'सह' इति पदं वर्तते अतः वयं 'रामेण' तथा 'सह'इत्यनयोः एवञ्च 'सीता' तथा 'सह' इत्यनयोः मध्ये सम्बन्धस्य अङ्कनं कुर्मः।




अत्र सम्बन्धाङ्कनस्य अपरः कश्चिद् विकल्पः वर्तते यत् 'रामेण' तथा 'सीता' इत्यनयोः मध्ये 'सहसम्बन्धः' इति भवेत्। यथा :




किन्तु वयं पदयोः मध्ये सम्बन्धस्य अङ्कनं कुर्मः, तानि पदानि वाचकानि भवन्तु उत वा द्योतकानि। अस्मिन् विकल्पे सह इति पदं त्यक्तं भवति। तस्मात् प्रथमचित्रस्यानुकरणं क्रियतेऽस्माभिः। अनेन प्रकारेणैव द्योतकपदानां यथा - इति, एव, अपि इत्यादीनाम् - अपि अङ्कनं कुर्मः

## 2 सम्बन्धानाम् अङ्कनस्य प्रतिज्ञा

सम्बन्धाङ्कनार्थं वयम् एकस्याः सरणेः उपयोगं कुर्मः। बाणसदृशेन चिह्नेन सम्बन्धं दर्शयामः। यथा रामः ओदनं पचति इत्यत्र रामः 'पचति' इत्यस्य कर्ता, तथा ओदनं पचति इत्यस्य कर्म। सम्बन्धानां नाम प्रथमान्ततया लिख्यते।




एतादृशैः चित्रैः विभिन्नसम्प्रदायानां शाब्दबोधः अपि प्राप्तुं शक्यते।

उदाहरणार्थं रामः इत्यतः आरभ्य सर्वान् अंशान् स्पृष्ट्वा मूलक्रियायां समाप्य कश्चिद् वैयाकरणरीत्या 'रामकर्तृक-ओदनकर्मक-पाकानुकूलव्यापारः' इति शाब्दबोधं प्राप्नुयात्। वैपरीत्येन दृष्टं चेत् ओदनम् इत्यतः आरभ्य रामः इत्यत्र समाप्यमाने 'ओदनकर्मक-पाकानुकूल-कृतिमान् रामः' इति नैयायिकरीत्या शाब्दबोधम् अपि प्राप्तुं शक्यते। यद्यपि शाब्दबोधः विविधरीत्या जन्येत, चित्रे तु एकः प्रधानो बिन्दुः भवति। स मूलबिन्दुरिति कथ्यते तथा मुख्यविशेष्यं द्योतयति। वयं वैयाकरणरीत्या शाब्दबोधम् अनुसरामः। तस्माद् मूलबिन्दुः मूलक्रिया एव भवति। यतो हि क्रियैव वैयाकरणैः मुख्यविशेष्यत्वेन अङ्गीक्रियते।

वाक्यस्य अङ्कने वयं वैयाकरणानां शाब्दबोधप्रक्रियामनुसरामः इत्यतः "एकतिङ् वाक्यम्" इति नियमाद् वाक्ये एकं तिङन्तं नूनं भवेत्। यदि नास्ति तर्हि 'अस्ति/भवति' अनयोः एकम् अध्याहार्यम्। पतञ्जलेरप्ययं अभिप्रायः "अस्तिभवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति" (महाभाष्यम् 2/3/1) सङ्गणकम् अभिलक्ष्य अङ्कनार्थं text सञ्चिका एव अपेक्षिता, चित्रस्य अपेक्षा नास्ति।

अङ्कनस्य प्रक्रिया इत्थं - वाक्यस्य प्रत्येकं शब्दः प्रत्येकं पङ्क्तौ भवेत्। प्रत्येकस्य शब्दस्य एका सङ्ख्या भवेत्। शब्दस्य यः सम्बन्धः अन्येन शब्देन सह वर्तते तस्य सम्बन्धस्य नाम एवञ्च येन सह सम्बन्धः तस्य शब्दस्य सङ्ख्या तत्र लेखनीया। शब्द-सङ्ख्ययोः मध्ये सङ्ख्यामेव वयं सङ्ख्यामेव अङ्कनार्थं चिनुमः। यतः एकस्मिन् वाक्ये एक एव शब्दः असकृत् प्रयुज्येत, तेन शब्दः संशयं जनयेत्। सङ्ख्यादानेन प्रत्येकस्य शब्दस्य एका सङ्ख्या निर्धारिता भवति येन शब्दस्य निर्णये संशयो न जायते। एवञ्च वाक्ये यद् मुख्यं विशेष्यं तस्य पार्श्वे कश्चन सम्बन्धः न अङ्क्यते।

अनया रीत्या 'रामः ओदनं पचति' इत्यत्र अङ्कनं पश्यामः :

1 रामः कर्ता 3

2 ओदनं कर्म 3

3 पचति

## 3 स्थूलसूक्ष्मविचारः

प्रो॰ के॰वी॰रामकृष्णमाचार्येण (2009) प्रस्तुतसम्बन्धानां सूची परिशिष्टे संयोजिता अस्ति। तत्र प्रत्येकस्य कारकस्य कृते विशिष्टरूपेण सम्बन्धाः श्रेण्यामुपश्रेण्यां च प्रतिपादिताः। कारकविश्लेषणं गभीरार्थविश्लेषणार्थम् आवश्यकम् एवञ्च भाषाव्यत्यासानां समाधानार्थं सहायकं वर्तते। एतदर्थम् अङ्कनकर्तारः वैयाकरणाः भवेयुः। त्रिधाङ्कनं करणीयम् इति प्रस्तावः

- स्तरः 1 अस्मिन् पत्रे यथा सूचितं तदनुसारेण स्थूलसूचनाङ्कनं करणीयम् इति प्रस्तावः।

- स्तरः 2 सम्बन्धानां संविभागः सूक्ष्माङ्कनञ्च (एतत् यन्त्रेण कर्तुं शक्यते।)

- स्तरः 3 आर्थिकस्तरे अङ्कनम्।

क) रामः दुग्धम् पीत्वा शालाम् गच्छति इति वाक्ये -

प्रथमस्तरे 'रामः' इत्यस्य अङ्कनं 'गच्छति' इत्यस्य कर्ता इति करणीयम्। द्वितीयस्तरे यन्त्रं स्वयमेव पीत्वा एवं रामः इत्यनयोः मध्ये कर्ता इति तु कर्तुं शक्नोति।

ख) घटः नश्यति :-

अत्र नश्यति इति क्रियायाः कर्ता घटः इति अङ्कनं करणीयम्। द्वितीयस्तरे क्रियां दृष्ट्वा 'घटः' इति अनुभवी कर्ता इत्यङ्कनं यन्त्रेण स्वयं कर्तुं शक्यते।

ग) स्थाली पचति :-

अत्र पचति इति क्रियायाः कर्ता स्थाली इति अङ्कनं करणीयम्। द्वितीयस्तरे स्थाली इत्यस्य अधिकरणम् इत्यङ्कनं भवितुमर्हति। सम्प्रति तु प्रथमस्तरे अङ्कनं कथम् इत्येव चर्च्यते।

## 4 अङ्कने लघिष्ठः अंशः

अङ्कनस्य विषये चर्चाया आरम्भात् प्राक् अङ्कने लघिष्ठम् अंशं निश्चिनुमः। वयं पदानां सम्बन्धस्य विषये चर्चामहे इत्यस्मादेव सिद्धं यद् वाक्यमेव लघिष्ठः अंशः भवति। स्वभावतः अयं प्रश्नः समुदेति यत्, वाक्यं नाम किम्? सङ्गणकीयदृष्ट्या वाक्यं नाम पूर्णविरामचिह्नेन प्रश्नचिह्नेन वा समाप्यमानः पदसमूह एव वाक्यम्। वाक्यानाम् उदाहरणानि यथा -

१. रामः वनं गच्छति।

२. रामः प्रतिदिनं शालां गच्छति।

३. किन्तु सः पाठं न पठति।

४. रामः खादति पिवति च।

५. यदि त्वम् इच्छसि तर्हि अहं तव गृहम् आगमिष्यामि।

६. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

एषु वाक्येषु आदितः त्रिषु एकमेव तिङन्तं पदं वर्तते, अपरयोः द्वयोः एकाधिकानि तिङन्तानि वर्तन्ते।

## 5 संस्कृते प्रस्तावितः कारकाङ्कनसमूहः

अङ्कनानि सामान्यतः द्विविधानि भवेयुः :-

1. वाक्यीयसम्बन्धाः : प्रत्येकं तिङन्तपदस्य स्वकीयाः आकाङ्क्षाः भविष्यन्ति। तिङन्तस्य अधीनानां पदानां पदान्तरैः सम्बन्धः वाक्यीयसम्बन्धः इति निर्दिश्यते।

2. आन्तर्वाक्यसम्बन्धाः : येन तिङन्तद्वयस्य अथवा एकस्य तिङन्तस्य अधीनस्य कस्यचित् पदस्य अपरतिङन्ताधीनपदेन सम्बन्धः क्रियते तस्य सम्बन्धस्य आन्तर्वाक्यसम्बन्ध इति निर्देशः।

उभयमपि पुनः शब्दानाम् अर्थवैविध्येन तथा सम्बन्धानां वैचित्र्येण विभाजयितुं शक्यते।

1. वाक्यीयसम्बन्धः :
   (a) कारक-सम्बन्धः
   (b) कारकेतर-सम्बन्धः
2. आन्तर्वाक्यसम्बन्धः :
   (a) वाक्ययोजकानि अव्ययानि
   (b) सापेक्षसर्वनामानि

## 5.1 कारक सम्बन्धाः

### 5.1.1 कर्ता

को नाम कर्ता ? स्वतन्त्रः कर्ता (1/4/54) क्रियायां स्वातन्त्र्येण विवक्षितार्थः कर्ता इति। कर्ता इत्यत्र कर्तृकरणयोस्तृतीया (2/3/18) इत्यनेन सूत्रेण अनभिहिते कर्तरि तृतीया विभक्तिर्भवति। अभिहिते तु प्रातिपदिकार्थमात्रे कर्तरि प्रथमा विभक्तिर्भवति। यदि कर्तुः योगः कृदन्तेन भवति तर्हि कर्तृकर्मणोः कृति (2/3/65) इत्यनेन कर्तरि षष्ठीविभक्तिर्विधीयते। यदा क्रिया भावलक्षणसप्तम्यन्ता भवति तदा कर्ता तृतीयायां सप्तम्यां वा भवेत्।

<table>
<tr><th colspan="2">(1) रामः पचति।</th></tr>
<tr><td>1 रामः कर्ता 2<br>2 पचति</td><td>
</td></tr>
</table>

उदाहरणेऽस्मिन् 'स्वतन्त्रः कर्ता' इत्यनेन रामः कर्ता भवति, तत्र अभिहितत्वात् प्रथमाविभक्तिः।

<table>
<tr><th colspan="2">(2) रामस्य गमनं भवति।</th></tr>
<tr><td>1 रामस्य कर्ता 2<br>2 गमनं कर्ता 3<br>3 भवति</td><td>
</td></tr>
</table>

उदाहरणेऽस्मिन्  'राम' इत्यस्य गमनक्रियायां स्वातन्त्र्यम्  अस्ति अतः 'स्वतन्त्रः कर्ता' इत्यनेन स कर्ता भवति, गमनम्  इति कृदन्तं पदं वर्तते अतः 'कर्तृकर्मणोः कृति' इत्यनेन राम इत्यत्र कृद्योगे षष्ठीविभक्तिः।

| (3) रामेण गम्यते। | |
|---|---|
| 1 रामेण कर्ता 2<br>2 गम्यते |  |

उदाहरणेऽस्मिन् तु 'स्वतन्त्रः कर्ता' इत्यनेन रामः कर्ता भवति, 'कर्तृकरणयोस्तृतीया' इत्यनेन रामेण इत्यत्र कर्तुः अनभिहितत्वात् तृतीयाविभक्तिः।

| (4) रामे वनं गच्छति सीता अनुसरति। | |
|---|---|
| 1 रामे कर्ता 3<br>2 वनं कर्म 3<br>3 गच्छति समानकालः 6<br>4 सीता कर्ता 5<br>5 अनुसरति |  |

### 5.1.2 प्रयोजककर्ता

| (5) देवदत्तः विश्वामित्रेण ओदनं पाचयति। | |
|---|---|
| 1 देवदत्तः प्रयोजककर्ता 4<br>2 विश्वामित्रेण प्रयोज्यकर्ता 4<br>3 ओदनं कर्म 4<br>4 पाचयति |  |

### 5.1.3 प्रयोज्यकर्ता

सामान्येन प्रयोज्यकर्तरि तृतीयाविभक्तिर्भवति।

| (6) देवदत्तः विश्वामित्रेण पाचयति। | |
|---|---|
| 1 देवदत्तः प्रयोजककर्ता 3<br>2 विश्वामित्रेण प्रयोज्यकर्ता 3<br>3 पाचयति |  |

[यदि अत्र क्रियाः गत्यर्थ-बुद्ध्यर्थ-प्रत्यवसानार्थ-शब्दकर्मक-अकर्मकाः सन्ति तर्हि 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि

कर्ता स णौ' (1/4/52) इत्यनेन सूत्रेण प्रयोज्यकर्तरि द्वितीयाविभक्तिः भवति].

<table>
<tr><th colspan="2">(7) माता बालं क्षीरं पाययति।</th></tr>
<tr><td>1 माता प्रयोजककर्ता 4<br>2 बालम् प्रयोज्यकर्ता 4<br>3 क्षीरम् कर्म 4<br>4 पाययति</td><td>
</td></tr>
</table>

### 5.1.4 मध्यस्थकर्ता

'प्रयोज्यकर्ता एवं प्रयोजकर्ता' इत्यनयोः मध्ये एकः मध्यस्थकर्ता अपि भवितुमर्हति। यथा अस्मिन् वाक्ये :-

<table>
<tr><th colspan="2">(8) माता धात्र्या बालं दुग्धं पाययति</th></tr>
<tr><td>1 माता कर्ता 5<br>2 धात्र्या मध्यस्थकर्ता 5<br>3 बालं प्रयोज्यकर्ता 5<br>4 दुग्धं कर्म 5<br>5 पाययति</td><td>
</td></tr>
</table>

### 5.1.5 कर्म

कर्तुरीप्सिततमं कर्म (1/4/49) कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। यदि कर्म अभिहितं तर्हि तत्र प्रातिपदिकार्थमात्रे प्रथमाविभक्तिर्भवति। यदि अनभिहितं कर्म वर्तते तर्हि कर्मणि द्वितीया(2/3/2) इत्यनेन अनभिहिते कर्मणि द्वितीया विभक्तिः भवति। यदि कर्मणः योगः कृदन्तेन सह वर्तते तर्हि कर्तृकर्मणोः कृति (2/3/65) इत्यनेन सूत्रेण तत्र कृद्योगे कर्मणि षष्ठीविभक्तिः विधीयते।

<table>
<tr><th colspan="2">(9) रामेण ग्रामः गम्यते</th></tr>
<tr><td>1 रामेण कर्ता 3<br>2 ग्रामः कर्म 3<br>3 गम्यते</td><td>
</td></tr>
</table>

<table>
<tr><th colspan="2">(10) शत्रून् जयति।</th></tr>
<tr><td>1 शत्रून् कर्म 2<br>2 जयति</td><td>
</td></tr>
</table>

| (11) रामेण प्रजायाः शासनं क्रियते। | |
|---|---|
| 1 रामेण कर्ता 4<br>2 प्रजायाः कर्म 3<br>3 शासनम् कर्म 4<br>4 क्रियते |  |

### 5.1.6 गौणकर्म एवं मुख्यकर्म

द्विकर्मकधातूनां विषये एषा कारिका प्रसिद्धा :

दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थ्मुषाम्।

कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥

अत्र ये धातवः सन्ति तत्र अकथितं यत् कारकं तस्य कर्मसंज्ञा भवति। सा कर्मसंज्ञा गौणी भवति अतः गौणकर्म इति उच्यते। यत् कर्म कर्तुरीप्सिततमत्वेन भवति तत् मुख्यकर्म भवति। गौणमुख्यकर्मणः अङ्कनस्य मुख्योद्देश्यम् अग्रिमस्तरे यन्त्रस्य शिक्षणे तस्य उपयोगः। पुनश्च कर्मणिप्रयोगे तस्य अपेक्षा विशेषतया भवति।

| (12) गोपालः गां दुग्धं दोग्धि। | |
|---|---|
| 1 गोपालः कर्ता 4<br>2 गां गौणकर्म 4<br>3 दुग्धं मुख्यकर्म 4<br>4 दोग्धि |  |

| (13) गोपालेन गौः दुग्धम् दुह्यते। | |
|---|---|
| 1 गोपालेन कर्ता 4<br>2 गौः गौणकर्म 4<br>3 दुग्धं मुख्यकर्म 4<br>4 दुह्यते |  |

| (14) तेन अजा ग्रामं नीयते। |
|---|
| 1 तेन कर्ता 4<br>2 अजां मुख्यकर्म 4<br>3 ग्रामं गौणकर्म 4<br>4 नीयते |




इष्-धातोः कर्म

| (15) बालकः पठितुम् इच्छति। |
|---|
| 1 बालकः कर्ता 3<br>2 पठितुम् कर्म 3<br>3 इच्छति |




अत्र पठितुम् इत्यस्य कर्मसंज्ञा धातोः कर्मणः समानकर्तृकाद् इच्छायां वा इति सूत्रेण सिद्धान्त्यते।

### 5.1.7 करणम्

| (16) बालः कुञ्चिकया तालम् उद्घाटयति। |
|---|
| 1 बालः कर्ता 4<br>2 कुञ्चिकया करणम् 4<br>3 तालम् कर्म 4<br>4 उद्घाटयति |




### 5.1.8 सम्प्रदानम्

| (17) देवदत्तः ब्राह्मणाय गाम् ददाति। |
|---|
| 1. देवदत्तः कर्ता 4<br>2. ब्राह्मणाय सम्प्रदानम् 4<br>3. गाम् कर्म 4<br>4. ददाति |



| (18) खण्डिकोपाध्यायः शिष्याय चपेटां ददाति। | |
|---|---|
| 1 खण्डिकोपाध्यायः कर्ता 4<br>2 शिष्याय सम्प्रदानम् 4<br>3 चपेटां कर्म 4<br>4 ददाति |  |

**5.1.9** अपादानम्

| (22) वृक्षात् पर्णं पतति। | |
|---|---|
| 1. वृक्षात् अपादानम् 3<br>2. पर्णम् कर्ता 3<br>3. पतति |  |

**5.1.10** अधिकरणम्

आधारोऽधिकरणम् (1/4/45) कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणं स्यात्। अस्मिन् प्रकरणे अधिकरणं त्रिविधम् - देशाधिकरणम्, कालाधिकरणम् एवं विषयाधिकरणम्। यत् पदं देशं बोधयति तत्पदं यदि अधिकरणे प्रयुज्यते तर्हि तस्य देशाधिकरणम् इति अङ्कनं करणीयम्। यत् पदं कालं बोधयति तत्पदं यदि अधिकरणे प्रयुज्यते तर्हि तस्य कालाधिकरणम् इति अङ्कनं करणीयम्। यत् पदं विषयं बोधयति तत्पदं यदि अधिकरणे प्रयुज्यते तर्हि तस्य विषयाधिकरणम् इति अङ्कनं करणीयम्। एतेषु यदि किमपि पदम् अन्तर्भावितं न भवति तत् सामान्यतया अधिकरणम् इति ज्ञातव्यम्, तदनुगुणम् अङ्कनं करणीयम्।

| (23) वानरः वृक्षे वसति। | |
|---|---|
| 1 वानरः कर्ता 3<br>2 वृक्षे अधिकरणम् 3<br>3 वसति. |  |

| (24) वानरः आतपे उपविशति। | |
|---|---|
| 1 वानरः कर्ता 3<br>2 आतपे अधिकरणम् 3<br>3 उपविशति. |  |

| (25) त्रेतायुगे रामः आसीत्। | |
|---|---|
| 1 त्रेतायुगे कालाधिकरणम् 3<br>2 रामः कर्ता 3<br>3 आसीत् |  |

| (26) रामः अयोध्यायाम्  आसीत्। | |
|---|---|
| 1. रामः कर्ता 3<br>2. अयोध्यायाम्  देशाधिकरणम्  3<br>3. आसीत् |  |



| (27) मोक्षे इच्छा अस्ति। | |
|---|---|
| 1 मोक्षे विषयाधिकरणम्  3<br>2 इच्छा कर्ता 3<br>3 अस्ति |  |



### 5.1.11 लुप्तक्रियाकारकम्

कदाचित्  कस्यचित्  लुप्तस्य अथवा अप्रयुक्तस्य क्रियावाचकपदस्य किञ्चित्  कारकम्  उद्दिश्य काचन विभक्तिः विधीयते। तादृशविभक्तियुक्तपदस्य अङ्कनं लुप्तक्रियाकारकम्  इति क्रियते। यथा रामः प्रासादात्  नदीं प्रेक्षते इति वाक्ये प्रासादः लुप्तस्य आरुह्य इत्यस्य कर्म अथवा उपविश्य इत्यस्य अधिकरणं स्यात्।

| (28) रामः प्रासादात्  नदीं प्रेक्षते। | |
|---|---|
| 1 रामः कर्ता 4<br>2 प्रासादात्  लुप्तक्रियाकारकम्  4<br>3 नदीं कर्म 4<br>4 पश्यति |  |



| (29) अहम्  आसनात्  नदीं पश्यामि। | |
|---|---|
| 1 अहं कर्ता 4<br>2 आसनात्  लुप्तक्रियाकारकम्  4<br>3 नदीं कर्म 4<br>4 पश्यामि |  |



## 5.2 कारकेतरसम्बन्धः

### 5.2.1 सम्बोधनम्

सम्बुद्धौ यत्  पदं तस्य अङ्कनं सम्बोध्यः इति करणीयम्। सम्बोधनार्थम्  भो, अयि, हे, अरे इत्यादयः शब्दाः प्रयुज्यन्ते। तेषाम् अङ्कनं 'सम्बोधनसूचकम्' इति करणीयम्।

| (28) भो राम माम्  उद्धर। | |
|---|---|
| 1 भो सम्बोधनसूचकम्  2<br>2 राम सम्बोध्यः 4<br>3 माम्  कर्म 4<br>4 उद्धर |  |

### 5.2.2 प्रयोजनम्

तुमुन्नन्तपदानां मुख्यक्रियया सह प्रयोजनम्  इति अङ्कनं करणीयम्। कदाचित्  भावार्थकप्रत्ययेन चतुर्थीविभक्तेः अथवा अर्थशब्दस्य प्रयोगः भवति। तत्रापि प्रयोजनम्  इत्येव अङ्कनं करणीयम्।

| (29) अहं योगशास्त्रं पठितुम्  विद्यालयं गच्छामि | |
|---|---|
| 1 अहम्  कर्ता 5<br>2 योगशास्त्रम्  कर्म 3<br>3 पठितुम्  प्रयोजनम्  5<br>4 विद्यालयम्  कर्म 5<br>5 गच्छामि |  |

| (30) छात्रः अध्ययनाय विद्यालये वसति। | |
|---|---|
| 1 छात्रः कर्ता 4<br>2 अध्ययनाय प्रयोजनम्  4<br>3 विद्यालये अधिकरणम्  4<br>4 वसति |  |

| (31) छात्रः अध्ययनार्थं विद्यालये वसति। | |
|---|---|
| 1 छात्रः कर्ता 4<br>2 अध्ययनार्थं प्रयोजनम्  4<br>3 विद्यालये अधिकरणम्  4<br>4 वसति |  |

कदाचिद्  एकस्याः क्रियायाः प्रयोजनवाचिका अपरा क्रिया अप्रयुक्ता भवति। तस्याः अप्रयुज्यमानायाः कर्मणि क्रियार्थोपपदस्य च कर्मणि स्थानिनः (2/3/14) इत्यादिसूत्रेण चतुर्थी भवति। तत्र चतुर्थ्यन्तपदस्य मूलक्रियया सह प्रयोजनम्  इति सम्बन्धेन अङ्कनं

कुर्मः। यथा -

| (19) नृसिंहाय नमस्कुर्मः | |
|---|---|
| 1 नृसिंहाय प्रयोजनम् 2<br>2 नमस्कुर्मः |  |

| (20) युद्धाय गच्छति | |
|---|---|
| 1 युद्धाय प्रयोजनम् 2<br>2 गच्छति |  |

| (21) फलेभ्यः याति | |
|---|---|
| 1 फलेभ्यः प्रयोजनम् 2<br>2 याति |  |

### 5.2.3 तादर्थ्यम्

यदा चतुर्थ्यन्तपदस्य सम्बन्धः सुबन्तेन सह भवति तत्र तादर्थ्यम् इत्यङ्कनीयम्। 'तादर्थ्ये चतुर्थी वाच्या' (वा०) इति वार्तिकेन तादर्थ्यवाचकेन शब्देन चतुर्थीविभक्तिः विधीयते।

| (32) सः बालकाय पुस्तकं क्रीणाति। | |
|---|---|
| 1 सः कर्ता 4<br>2 बालकाय तादर्थ्यम् 3<br>3 पुस्तकम् कर्म 4<br>4 क्रीणाति |  |

| (33)यूपाय दारुः अस्ति। | |
|---|---|
| 1 यूपाय तादर्थ्यम् 2<br>2 दारुः कर्ता 3<br>3 अस्ति |  |

### 5.2.4 हेतुः

द्रव्यादिव्यापारसाधारणं निर्व्यापारसाधारणं च हेतुत्वम्। (सि०) हेतौ द्योत्ये तृतीयापञ्चमीविभक्ती भवतः। तत्र हेतुः इति अङ्कनीयम्।

| (34) विद्यार्थी अध्ययनेन विद्यालये वसति। | |
|---|---|
| 1 विद्यार्थी कर्ता 4<br>2 अध्ययनेन हेतुः 4<br>3 विद्यालये अधिकरणम् 4<br>4 वसति. |  |



| (35) जाड्यात् मूर्खः बद्धः अस्ति। | |
|---|---|
| 1 जाड्यात् हेतुः 3<br>2 मूर्खः कर्ता 3<br>3 बद्धः(अस्ति) |  |



अस्त्यर्थकधातौ विद्यमाने सति सुबन्तस्य सुबन्तेन सह हेतुः इति सम्बन्धः भवति।

| (36) दण्डेन घटः अस्ति। | |
|---|---|
| 1 दण्डेन हेतुः 2<br>2 घटः कर्ता 3<br>3 अस्ति |  |



### 5.2.5 वीप्सा

यत्र वीप्सा भवति तत्र द्वौ शब्दौ भवतः, तत्र प्रथमशब्दे 'वीप्सा' इति अङ्कनं करणीयम्। एवञ्च द्वितीयशब्दे यः सम्बन्धः (कारक/अकारकसम्बन्धः) सः अङ्कनीयः। उदाहरणे पश्यामः -

| (37) रामः कस्मै कस्मै ददाति। | |
|---|---|
| 1 रामः कर्ता 4<br>2 कस्मै वीप्सा 3<br>3 कस्मै सम्प्रदानम् 4<br>4 ददाति |  |



| (38) रामः किं किं ददाति। | |
|---|---|
| 1 रामः कर्ता 4<br>2 किं वीप्सा 3<br>3 किं कर्म 4<br>4 ददाति |  |

| (39) हस्ती मन्दं मन्दं चलति। | |
|---|---|
| 1 हस्ती कर्ता 4<br>2 मन्दं वीप्सा 3<br>3 मन्दं क्रियाविशेषणम् 4<br>4 चलति |  |



### 5.2.6 क्रियाविशेषणम्

यदा कोऽपि शब्दः क्रियायाः विशेषतां वक्ति तस्य शब्दस्य क्रियाविशेषणम् इति अङ्कनीयम्।

| (40) हस्ती मार्गे मन्दं गच्छति। | |
|---|---|
| 1 हस्ती कर्ता 4<br>2 मार्गे अधिकरण 4<br>3 मन्दम् क्रियाविशेषणम् 4<br>4 गच्छति |  |



| (41) मृगः वेगेन धावति। | |
|---|---|
| 1 मृगः कर्ता 3<br>2 वेगेन क्रियाविशेषणम् 3<br>3 धावति |  |



| (42) ब्राह्मणवत् रामः अधीते। | |
|---|---|
| 1. ब्राह्मणवत् क्रियाविशेषणम् 3<br>2. रामः कर्ता 3<br>3. अधीते |  |



### 5.2.7 षष्ठीसम्बन्धः

यः षष्ठीविभक्त्यन्तः शब्दः यत्र कारकं न बोधयति (उदाहरणं पश्यतु 3, 11) तत्र षष्ठीसम्बन्धः इति अङ्कनं करणीयम्।

| (43) अध्यापकस्य पुस्तकं छात्राः पठन्ति। | |
|---|---|
| 1 अध्यापकस्य षष्ठीसम्बन्धः 2<br>2 पुस्तकम् कर्म 4<br>3 छात्राः कर्ता 4<br>4 पठन्ति |  |

### 5.2.8 निर्धारणम्

यत्र निर्धारणं क्रियते तत्र 'यतश्च निर्धारणम्' (2/3/41) इत्यनेन सूत्रेण षष्ठी एवञ्च सप्तमी विभक्ती भवतः। तत्र निर्धारणम् इति अङ्कनं करणीयम्।

<table>
<tr><th colspan="2">(44) गवां कृष्णा बहुक्षीरा अस्ति</th></tr>
<tr><td>1 गवां निर्धारणम् 3<br>2 कृष्णा कर्ता 4<br>3 बहुक्षीरा कर्तृसमानाधिकरण 4<br>4 अस्ति</td><td>
</td></tr>
</table>

<table>
<tr><th colspan="2">(45) गोषु कृष्णा बहुक्षीरा अस्ति</th></tr>
<tr><td>1 गोषु निर्धारणम् 2<br>2 कृष्णा कर्ता 4<br>3 बहुक्षीरा कर्तृसमानाधिकरण 4<br>4 अस्ति</td><td>
</td></tr>
</table>

### 5.2.9 विभक्तम्

यत्र एकस्य अपेक्षया अपरस्य उत्कर्षः अथवा अपकर्षः द्योत्यते तत्र यस्मात् उत्कर्षः अथवा अपकर्षो भवति ततः विभक्तम् इति अङ्कनं क्रियते। यथा -

<table>
<tr><th colspan="2">(46) रामात् श्यामः उन्नतः अस्ति।</th></tr>
<tr><td>1 रामात् विभक्तम् 2<br>2 श्यामः कर्ता 4<br>3 उन्नतः कर्तृसमानाधिकरणम् 4<br>4 अस्ति</td><td>
</td></tr>
</table>

### 5.2.10 प्रभृति - पर्यन्तम्

बुधवारात् शनिवारपर्यन्तं परीक्षा भविष्यति इति वाक्ये बुधवारा-शनिवारयोर्मध्यवर्ती कालः भवति-क्रियायाः अधिकरणं भवति। अत्र वाक्यस्य अङ्कनम् इत्थं भवति -

1 बुधवारात् प्रभृति 4

2 शनिवारपर्यन्तं पर्यन्तम् 4

3 परीक्षा कर्ता 4

4 भविष्यति।

अत्रेदं ध्येयं यत् प्रभृति पर्यन्तम् इति अङ्कनद्वयं सहैव प्रवर्तिष्यते।

### 5.2.11 शेषसम्बन्धः

यत्र पाणिनिना कारकसम्बन्धं विहाय साक्षात् विभक्तिनिर्धारणं कृतं तत्र शेषसम्बन्धः इति अङ्कनं करणीयम्। उदाहरणं पश्यामः -

<table>
<tr><th colspan="2">(47) बालः अक्ष्णा काणः वर्तते।</th></tr>
<tr><td>1 बालः कर्ता 4<br>2 अक्ष्णा शेषसम्बन्धः 3<br>3 काणः कर्तृसमानाधिकरणम् 4<br>4 वर्तते</td><td>
</td></tr>
</table>

<table>
<tr><th colspan="2">(47) रामः गोषु स्वामी वर्तते।</th></tr>
<tr><td>1 रामः कर्ता 4<br>2 गोषु शेषसम्बन्धः 3<br>3 स्वामी कर्तृसमानाधिकरणम् 4<br>4 वर्तते</td><td>
</td></tr>
</table>

<table>
<tr><th colspan="2">(48) गोभ्यः हितम् इदम् औषधम् अस्ति।</th></tr>
<tr><td>1 गोभ्यः शेषसम्बन्धः 2<br>2 हितं कर्तृसमानाधिकरणम् 5<br>3 इदं विशेषणम् 4<br>4 औषधं कर्ता 5<br>5 अस्ति</td><td>
</td></tr>
</table>

### 5.2.12 तुमुन्

तुमुनः चतुर्धा अर्थः पाणिनिना निर्दिष्टः। सूत्राणि इत्थम् :

a) तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् - अनेन सूत्रेण विहितस्य तुमुनः क्रियया सह प्रयोजनम् इति अङ्कनं क्रियते।

b) कालसमयवेलासु तुमुन् - अनेन सूत्रेण विहितस्य तुमुनः कालवाचकपदेन सह कालार्थकतुमुन् इति अङ्कनं क्रियते।

c) शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् -

d) पर्याप्तिवचनेषु अलमर्थेषु - अनेन सूत्रेण विहितस्य तुमुनः समर्थार्थकशब्देन सह अलमर्थकतुमुन् इति अङ्कनं क्रियते।

चतुर्षु स्थलेषु तुमुन्नन्तस्यार्थः भिन्नः अस्ति। अतः तुमुनः अर्थः सन्दिग्धः भवति। किन्तु कोशात् पदस्य अवस्थानाच्च निर्णेतुं शक्यते।

तत्र प्रथमसूत्रेण विधीयमानस्य तुमुनः कृते प्रयोजनं (5.2.2) इत्यङ्कनीयम्। अन्येषाम् उदाहरणानि इत्थम् -

कालार्थकतुमुन्

| (49) अयं भोक्तुं कालः अस्ति। | |
|---|---|
| 1 अयं कर्ता 4<br>2 भोक्तुं कालार्थकतुमुन् 3<br>3 कालः कर्तृसमानाधिकरणम् 4<br>4 अस्ति |  |



अस्त्यर्थकतुमुन्

शकधृषेत्यादिसूत्रेण यत्र तुमुन् विहितः तत्र तुमुन्नन्तस्य शक-प्रभृतिक्रियया सह underscore चिह्नेन एकतां सम्पाद्य तस्य पदान्तरैः सह यथानियमम् अङ्कनं क्रियते। यथा -

| (50) सः गन्तुं शक्नोति। | |
|---|---|
| 1 सः कर्ता 2<br>2 गन्तुं_शक्नोति |  |



अलमर्थकतुमुन्

| (51) सः इदं ज्ञातुं समर्थः अस्ति। | |
|---|---|
| 1 सः कर्ता 5<br>2 इदं कर्म 3<br>3 ज्ञातुं अलमर्थकतुमुन् 4<br>4 समर्थः कर्तृसमानाधिकरणम् 5<br>5 अस्ति |  |

## 5.3 कृदन्त-क्रिया-सम्बन्ध

### 5.3.1 पूर्वकालः

क्त्वाप्रत्ययान्तधातुवाच्यक्रिया अपरक्रियापेक्षया पूर्वकालिकी भवति, ईदृशसम्बन्धः पूर्वकालः इति नाम्ना अभिधीयते।

| (52) रामः दुग्धं पीत्वा शालां गच्छति | |
|---|---|
| 1 रामः कर्ता 5<br>2 दुग्धम् कर्म 3<br>3 पीत्वा पूर्वकालः 5<br>4 शालाम् कर्म 5<br>5 गच्छति |  |

### 5.3.2 समानकालः

शतृशानच्-प्रत्ययान्तधातुवाच्यक्रिया यदा क्रियान्तरेण सम्बध्यते तदा क्रियाद्वयस्य समानकालिकत्वं ज्ञायते। अतः अयं सम्बन्धः अत्र समानकालः इति नाम्ना अभिधीयते।

| (53) बालकः जलं पिबन् हसति | |
|---|---|
| 1 बालकः कर्ता 4<br>2 जलम् कर्म 3<br>3 पिबन् समानकालः 4<br>4 गच्छति |  |

| (54) बालकः शयानः हसति | |
|---|---|
| 1 बालकः कर्ता 3<br>2 शयानः समानकालः 3<br>3 हसति. |  |

| (55) बालकः उपविष्टः हसति। | |
|---|---|
| 1 बालः कर्त्ता 3<br>2 उपविष्टः(सन्) समानकालः 3<br>3 हसति |  |

| (56) रामे वनं गच्छति सीता अनुसरति। | |
|---|---|
| 1 रामे कर्त्ता 3<br>2 वनं कर्म 3<br>3 गच्छति समानकालः 5<br>4 सीता कर्त्ता 5<br>5 अनुसरति |  |



### 5.3.3 अनन्तरकालः

लृट्-स्थानक-शतृशानच्-प्रत्ययान्तधातुवाच्यक्रिया (लृटः स्थाने यौ शतृशानचौ विधीयेते तदन्तधातुवाच्यक्रिया) अपरक्रियाया अनन्तरं भविष्यति, तस्माद् अस्य सम्बन्धस्य नाम अनन्तरकाल इति स्थिरीकृतम्। यथा -

| (57) रामः पुस्तकं पठिष्यन् गृहं गच्छति। | |
|---|---|
| 1 रामः कर्त्ता 5<br>2 पुस्तकम् कर्म 3<br>3 पठिष्यन् अनन्तरकालः 5<br>4 गृहम् कर्म 5<br>5 गच्छति |  |



### 5.3.4 भावलक्षणसप्तमी_पूर्वकालः

सप्तम्यन्त-क्तप्रत्ययान्तपदेन मूलक्रियायाः पूर्ववर्तिनी क्रिया उच्यते। यथा -

रामे वनं गते सति दशरथः खिन्नः अभवत्।

अत्र गते_सति इत्यस्य अभवत् इत्यनेन सह भावलक्षणसप्तमी_पूर्वकालः इति अङ्कनं क्रियते।

<table>
<tr><th colspan="2">(58) रामे वनं गते सति दशरथः खिन्नः अभवत्।।</th></tr>
<tr><td>1 रामे कर्त्ता 3<br>2 वनम्  कर्म 3<br>3 गते_सति अनन्तरकालः 6<br>4 दशरथः कर्ता 6<br>5 खिन्नः कर्तृसमानाधिकरणम्  6<br>6 अभवत्</td><td>
</td></tr>
</table>

कदाचित्  अत्र सति इति न प्रयुज्येत अपि। यथा -

<table>
<tr><th colspan="2">(59) रामे वनं गते दशरथः खिन्नः अभूत्</th></tr>
<tr><td>1 रामे कर्त्ता 3<br>2 वनं कर्म 3<br>3 गते पूर्वकालः 6<br>4 दशरथः कर्त्ता 6<br>5 खिन्नः कर्तासमानाधिकरण 6<br>6 अभूत्</td><td>
</td></tr>
</table>

<table>
<tr><th colspan="2">(60) रामे वनं गते भरतः सेवकः अभवत्।</th></tr>
<tr><td>1 रामे कर्त्ता 3<br>2 वनं कर्म 3<br>3 गते पूर्वकालः 6<br>4 भरतः कर्त्ता 6<br>5 सेवकः कर्तासमानाधिकरण 6<br>6 अभवत्</td><td>
</td></tr>
</table>

### 5.3.5 भावलक्षणसप्तमी_समकालः

सप्तम्यन्त-शतृ-शानजन्तपदस्य मूलक्रियया सह समानकालता भवति। तत्र अङ्कनम्  इत्थम्  -

<table>
<tr><td colspan="2">(61) रामे वनं गच्छति सीता अनुसरति।</td></tr>
<tr><td>1 रामे कर्त्ता 3<br>2 वनं कर्म 3<br>3 गच्छति भावलक्षणसप्तमी_समानकालः 5<br>4 सीता कर्त्ता 5<br>5 अनुसरति</td><td>
</td></tr>
</table>

### 5.3.6 भावलक्षणसप्तमी_अनन्तरकालः

लृटः स्थाने यौ शतृ-शानचौ तदन्तः शब्दः यदि सप्तम्यां भवति, तर्हि तस्य भावलक्षणसप्तमी_अनन्तरकालः इति अङ्कनं करणीयम्। यथा -

<table>
<tr><td colspan="2">(62) गोषु धोक्ष्यमाणासु मोहनः गतः।</td></tr>
<tr><td>1 गोषु कर्म 2<br>2 धोक्ष्यमाणासु अनन्तरकालः 4<br>3 मोहनः कर्त्ता 4<br>4 गतः(आसीत्)</td><td>
</td></tr>
</table>

### 5.3.7 विशेषणम्

विशेषणं द्विविधं भवति, उद्देश्यं विधेयञ्च। यानि उद्देश्यं विशेषयन्ति तानि विशेषणम्  इति नाम्ना अभिधीयन्तेऽत्र। यानि च विधेयत्वेन प्रयुज्यन्ते तानि कर्तृसमानाधिकरणम्  अथवा कर्मसमानाधिकरणम्  इति नाम्ना अभिधीयन्ते। (यदा तत्  कर्तुः विशेषणं भवति तदा कर्तृसमानाधिकरणम्, यदा च कर्मणः विशेषणं भवति तदा कर्मसमानाधिकरणम्  इति उच्यते। यथा -

| (63) दाशरथिः रामः वनं गच्छति। | |
|---|---|
| 1 दाशरथिः विशेषणम् 2<br>2 रामः कर्ता 4<br>3 वनं कर्म 4<br>4 गच्छति |  |



| (64) शयानं बालं पश्य। | |
|---|---|
| 1 शयानं विशेषणम् 2<br>2 बालं कर्म 3<br>3 पश्य |  |



अस्य तुलना करणीया 'बालं शयानं पश्य। (68)' इत्यनेन सह

| (65) देवदत्तः अध्यापकः अस्ति। | |
|---|---|
| 1 देवदत्तः कर्ता 3<br>2 अध्यापकः कर्तृसमानाधिकरणम् 3<br>3 अस्ति |  |



| (66) बालः शयानः अस्ति। | |
|---|---|
| 1 बालः कर्त्ता 3<br>2 शयानः कर्त्तृसमानाधिकरणम् 3<br>3 अस्ति |  |



| (67) अहं त्वां शुनं मन्ये। | |
|---|---|
| 1 अहं कर्ता 4<br>2 त्वां कर्म 4<br>3 शुनं कर्मसमानाधिकरणम् 4<br>4 मन्ये |  |

<table>
<tr><th colspan="2">(68) बालं शयानं पश्य।</th></tr>
<tr><td>1 बालं कर्म 3<br>2 शयानं कर्म-समानाधिकरणम् 3<br>3 पश्य</td><td>
</td></tr>
</table>

उपरितनवाक्येषु प्रत्ययाः सम्बन्धनिश्चायकाः सन्ति। इदानीं तादृशदृष्टान्तान् परिशीलयामः, यत्र सम्बन्धः विभक्तिभिः न, अपितु पदैः निश्चीयते, एतेषां सम्बन्धः त्रिविधः भवति।

(क) समुच्चितम्/अन्यतरः

(ख) उपपदम्

(ग) शेषसम्बन्धः (पूर्वद्वयव्यतिरिक्ताः सर्वे सम्बन्धाः)

### 5.3.8 समुच्चितम्/अन्यतरः

इदं वाक्यं परिशीलयामः।

रामः सीता च वनम् गच्छतः।

अस्मिन् वाक्ये रामः सीता इत्युभौ गम्-धातोः कर्तारौ भवतः, वनं च गम्-धातोः कर्म भवति। अस्य अङ्कनम् इत्थं कर्तुं शक्यते -

<table>
<tr><th colspan="2">(69) रामः सीता च वनम् गच्छतः।</th></tr>
<tr><td>1 रामः कर्ता 4<br>2 सीता कर्ता 4<br>3 वनं कर्म 4<br>4 गच्छतः</td><td>
</td></tr>
</table>

किन्तु अत्र कर्तृत्वं रामे सीतायां च भिन्नतया न भवति। कर्तृत्वम् उभयोरपि समानतया, समानरूपेण च वर्तते। तस्मात् राम-सीतयोः समुच्चये कर्तृत्वं भवति। अतः अङ्कनम् इत्थं क्रियते -

<table>
<tr><th colspan="2">(69-a) रामः सीता च वनम् गच्छतः।</th></tr>
<tr><td>1 रामः समुच्चितम् 3<br>2 सीता समुच्चितम् 3<br>3 च कर्ता 5<br>4 वनं कर्म 5<br>5 गच्छतः</td><td>
</td></tr>
</table>

एतेन चित्रेण इदं स्पष्टं ज्ञायते यत्, कर्तृत्वं समुच्चये अस्ति इति। अतः सम्बन्धस्य अङ्कनम्  इत्थं क्रियते। अपरं वाक्यं-
रामः च सीता च वनम्  गच्छतः -  अत्रापि विश्लेषणं पूर्ववदेव भवति। केवलम्  एकः चकारः असम्बद्धः त्यज्यते। यथा -

| (70) रामः च सीता च वनं गच्छतः | |
|---|---|
| 1 रामः समुच्चितम्  4<br>2 च -<br>3 सीता समुच्चितम्  4<br>4 च कर्ता 6<br>5 वनम्  कर्म 6<br>6 गच्छतः |  |



अध्याहारः

कदाचित्  पूर्ववाक्यात्  क्रियापदं पदान्तरं वा अग्रिमे वाक्ये अनुवर्तते। तेषाम्  अङ्कनं कथमिति पश्यामः।

क)            क्रियाध्याहारः

रामः वनं गच्छति सीता च।

अत्र सीता च इत्यनेन 'सीता च वनं गच्छति' इत्यभिप्रेतम्। अतः विश्लेषणम्  इत्थम्-

| (71) रामः वनं गच्छति सीता च। | |
|---|---|
| 1 रामः कर्ता 3<br>2 वनं 3<br>3 गच्छति समुच्चितम्  6<br>4 सीता कर्ता 5<br>5 (गच्छति) समुच्चितम्  6<br>6 च |  |



अत्र सम्बन्धान्  दर्शयितुम्  अनिवार्यतया अपेक्षितानि पदान्येव आवृत्तानि। वनम्  इति पदं नावृत्तम्।

ख)            कारकाध्याहारः

इदं वाक्यं पश्यामः-

रामः वनं गच्छति फलम्  खादति च.

अत्र कर्तृवाचकस्य द्वितीयवाक्ये अध्याहारः क्रियते। अतः वयं रामः इति पदम्  अध्याहरामः। तत्  पदम्  अध्याहृतम्  इति ज्ञापयितुं तद्  बन्धन्यां स्थाप्यते। तत्र अङ्कनम्  इत्थम्  -

| (72) रामः वनं गच्छति फलम्  खादति च। | |
|---|---|
| 1 रामः कर्ता 3<br>2 वनम्  कर्म 3<br>3 गच्छति समुच्चितम्  7<br>4 (रामः) कर्ता 6<br>5 फलम्  कर्म 6<br>6 खादति समुच्चितम्  7<br>7 च |  |

### 5.3.9 अन्यतरः

यदि वाक्ये नामपदद्वयं 'वा' इत्यनेन योजितं भवति, तर्हि तयोः अन्यतरः इति अङ्कनं क्रियते। यथा -

a) रामः कृष्णः वा गच्छति।

| (73) रामः कृष्णः वा गच्छति। | |
|---|---|
| 1 रामः अन्यतरः 3<br>2 कृष्णः अन्यतरः 3<br>3 वा कर्ता 4<br>4 गच्छति |  |

b) रामः वा कृष्णः वा गच्छति।

| (74) रामः वा कृष्णः वा गच्छति। | |
|---|---|
| 1 रामः अन्यतरः 3<br>2 कृष्णः अन्यतरः 3<br>3 वा कर्ता 4<br>4 गच्छति<br>वा |  |

c) रामेण ग्रामः वनं वा गम्यते।

| (75) रामेण ग्रामः वनं वा गम्यते। | |
|---|---|
| 1 रामेण कर्ता 5<br>2 ग्रामः अन्यतरः 4<br>3 वनम् अन्यतरः 4<br>4 वा कर्म 5<br>5 गम्यते |  |

d) रामः ग्रामं वनं वा गच्छति।

| (76) रामः ग्रामं वनं वा गच्छति। | |
|---|---|
| 1 रामः कर्ता 5<br>2 ग्रामम् अन्यतरः 4<br>3 वनम् अन्यतरः 4<br>4 वा कर्म 5<br>5 गच्छति |  |

e) रामः ग्रामं वा वनं वा गच्छति

| (77) रामः ग्रामं वा वनं वा गच्छति। | |
|---|---|
| 1 रामः कर्ता 5<br>2 ग्रामम् अन्यतरः 4<br>3 वनम् अन्यतरः 4<br>4 वा कर्म 5<br>5 गच्छति<br>वा |  |

f) किं त्वं वनदेवता वा उत देवकन्या वा।

| (78) किं त्वं वनदेवता वा उत देवकन्या वा। | |
|---|---|
| 1 किम् सम्बन्धः 5<br>2 त्वम् अन्यतरः 4<br>3 वनदेवता अन्यतरः 4<br>4 देवकन्या अन्यतरः 5<br>5 वा कर्तृसमानाधिकरणम् 5<br>6 असि<br>7 उत<br>8 वा |  |



g) किं त्वं वनदेवता उतवा देवकन्या वा।

| (79) किं त्वं वनदेवता उतवा देवकन्या वा। | |
|---|---|
| 1 किम् सम्बन्धः 5<br>2 त्वम् अन्यतरः 4<br>3 वनदेवता अन्यतरः 4<br>4 देवकन्या अन्यतरः 5<br>5 वा कर्तृसमानाधिकरणम् 5<br>6 असि<br>7 उतवा |  |



## 5.4 उपपदविभक्तिः

उपपदानि तत्सम्बन्धप्रातिपदिकात् काञ्चन विशिष्टां विभक्तिं प्रवर्तयन्ति, यदा एतेषाम् उपपदानां पदान्तरैः सम्बन्धं परिशीलयामः, तदा एषां द्वैविध्यं परिलक्ष्यते।

(c1) कदाचित् उपपदानि अपरैः सुबन्तैः तिङन्तैः वा कारकसम्बन्धेन, विशेषणसम्बन्धेन वा सम्बध्यन्ते। यथा -

| (80) धनदेन समानम् रामं दशरथः पश्यति। | |
|---|---|
| 1 धनदेन उपपदसम्बन्धः 2<br>2 समानम् विशेषण 3<br>3 रामम् कर्म 5<br>4 दशरथः कर्त्ता 5<br>5 पश्यति |  |

| (81) ग्रामस्य समीपे पशवः चरन्ति। | |
|---|---|
| 1 ग्रामस्य उपपदसम्बन्धः 2<br>2 समीपे अधिकरण 4<br>3 पशवः कर्त्ता 4<br>4 चरन्ति |  |

| (82) ग्रामम् अभितः वृक्षाः सन्ति। | |
|---|---|
| 1 ग्रामम् उपपदसम्बन्धः 2<br>2 अभितः अधिकरण 4<br>3 वृक्षाः कर्त्ता 4<br>4 सन्ति. |  |

(c2) कानिचन उपपदानि अपरैः सुबन्तैः सह सम्बध्यमानाः स्वयमेव सम्बन्धं वदन्ति। यथा रामेण सह सीता वनं गच्छति।

अत्र रामेण, सीता इति पदद्वयस्य सम्बन्धः सह इत्यनेन उच्यते। रामशब्दात् या तृतीया विभक्तिः विहिता सा उपपदविभक्तिः, सह इति शब्दस्य योगात् प्रवृत्तेः। सह इति शब्देन वयमेतद्वदामः यत् सीतायाः क्रियया सह यः कारकसम्बन्धः स एव सम्बन्धः रामस्यापि क्रियया सह वर्तते। एतादृशस्थलेषु रामेण इत्यस्य सह इत्यनेन प्रतियोगी इति सम्बन्धेन सम्बधः तथा सह इत्यस्य सीता इत्यनेन अनुयोगी इति सम्बन्धः उच्यते। सम्बन्धानां नामकरणस्य अयं क्रमः नैयायिकैः साम्यं वहति तेषां मते। 'सह' सम्बन्धः रामसीतयोर्मध्ये वर्तते, यत्र रामः प्रतियोगी, सीता अनुयोगी इति।

| (83) रामेण सह सीता वनं गच्छति। | |
|---|---|
| 1 रामेण प्रतियोगी 2<br>2 सह अनुयोगी 3<br>3 सीता कर्त्ता 5<br>4 वनम् कर्म 5<br>5 गच्छति |  |

c) न, इव, एव, इति - एतादृशाः केचन शब्दाः सन्ति येषाम् अर्थाः तेषां सम्बन्धान् निर्धारयन्ति। यथा 'न' इति निषेधं द्योतयति, स्म इति भूतकालं, इव इति सादृश्यं द्योतयति। किन्तु इति, एव इत्यादयः केचन शब्दाः विविधान् सम्बन्धान् द्योतयन्ति। यथा 'इति' शब्दः कदाचित् शब्दस्वरूपं सूचयति, कदाचित् समाप्तिं सूचयति, कदाचित् 'इति' शब्देन कर्म द्योत्यते। 'एव' शब्दः

कदाचित् बलाधानं द्योतयति, कदाचिच्च अवधारणं द्योतयति। यदा एते शब्दाः शब्दद्वयेन सम्बध्यते, तत्र च एकः सम्बन्धः केनचित् कारकसम्बन्धेन अथवा कारकेतरसम्बन्धेन, अपरः सम्बन्धः 'सम्बन्धः' इति नाम्ना अभिधीयते। यदा तु शब्दद्वयम् एकेन शब्देन सह सम्बध्यते तदा वयं प्रतियोगी एवम् अनुयोगी इति सम्बन्धौ अभिधास्यामः। अत्र सम्बन्धः इत्यस्य यत् पदं तद्योग्यसम्बन्धः इत्यर्थः। तन्नाम, एव इत्यनेन सम्बन्धः अस्ति चेत्, सम्बन्धः इत्यस्य एवयोग्यसम्बन्धः अर्थः।

बहुषु स्थलेषु एतेषां शब्दानाम् अर्थाः सन्दिग्धाः भवन्ति। तत्र च सान्दर्भिकशब्दः सन्देहनिरसने सहायकाः भवन्ति। अस्मिन् स्तरे वयं सन्देहनिरसने यत्नवन्तो न स्मः। अग्रिमस्तरेषु एतदर्थं प्रयतिष्यामहे। अत्र कानिचिदुदाहरणानि अग्रिमे दृष्टान्तद्वये इति शब्दः शब्दस्वरूपं द्योतयति, तृतीये वाक्यसमाप्तिं सूचयति। अतः आद्यवाक्यद्वये सम्बन्धः प्रतियोगी अनुयोगी इति नाम्ना लक्ष्यामः, तृतीयवाक्ये च सम्बन्धः इति वक्ष्यामः।

| (84) श्रूयताम् इति आमन्त्र्य रामः अवोचत्। | |
|---|---|
| 1 श्रूयताम् प्रतियोगी 2<br>2 इति अनुयोगी 3<br>3 आमन्त्र्य पूर्वकालः 5<br>4 रामः कर्ता 5<br>5 अवोचत् |   |

| (85) श्रूयताम् इति आहूय युद्धम् अकार्षीत् | |
|---|---|
| 1 श्रूयताम् प्रतियोगी 2<br>2 इति अनुयोगी 3<br>3 आहूय पूर्वकालः 5<br>4 युद्धम् कर्म 5<br>5 अकार्षीत् |   |

<table>
<tr><td>(86) रामस्य पट्टाभिषेकः अभूत् इति</td><td></td></tr>
<tr><td>1 रामस्य कर्म 2<br>2 पट्टाभिषेकः कर्ता 3<br>3 अभूत्<br>4 इति सम्बन्धः 3</td><td>
</td></tr>
</table>

<table>
<tr><td>(87) कृष्णः मथुरायां वसति स्म।</td><td></td></tr>
<tr><td>1 कृष्णः कर्ता 3<br>2 मथुरायाम् अधिकरणम् 3<br>3 वसति<br>4 स्म सम्बन्धः 3</td><td>
</td></tr>
</table>

<table>
<tr><td>(88) चन्द्रम् इव मुखं पश्य</td><td></td></tr>
<tr><td>1 चन्द्रम् प्रतियोगी 2<br>2 इव अनुयोगी 3<br>3 मुखम् कर्म 4<br>4 पश्य</td><td>
</td></tr>
</table>

<table>
<tr><td>(89) रामः एव सुन्दरः अस्ति।</td><td></td></tr>
<tr><td>1 रामः कर्ता 4<br>2 एव सम्बन्धः 1<br>3 सुन्दरः कर्तृसमानाधिकरणम् 4<br>4 अस्ति</td><td>
</td></tr>
</table>

| (90) रामः सुन्दरः भवति एव। | |
|---|---|
| 1 रामः कर्ता 3<br>2 सुन्दरः कर्तृसमानाधिकरणम् 3<br>3 भवति<br>4 एव सम्बन्धः 3 |  |

| (91) रामः सुन्दरः एव भवति | |
|---|---|
| 1 रामः कर्ता 4<br>2 सुन्दरः कर्तृसमानाधिकरणम् 4<br>3 एव सम्बन्धः 2<br>4 भवति |  |

| (92) रामः वनम् न गच्छति | |
|---|---|
| 1 रामः कर्ता 4<br>2 वनम् कर्म 4<br>3 न सम्बन्धः 4<br>4 गच्छति |  |

| (93) सीता अपि वनं गच्छति। | |
|---|---|
| 1 सीता कर्ता 4<br>2 अपि सम्बन्धः 1<br>3 वनं कर्म 4<br>4 गच्छति |  |

| (94) वाल्मीकिः सर्वगुणैः युक्तं रामं वर्णयति। | |
|---|---|
| 1 वाल्मीकिः कर्ता 5<br>2 सर्वगुणैः सम्बन्धः 3<br>3 युक्तं विशेषण 4<br>4 रामं कर्म 5<br>5 वर्णयति |  |

### 5.4.1 पर्युदासः

यत्र नञ् भेदं पर्युदासं वा द्योतयति, तत्र न इत्यस्य शब्दद्वयेन प्रतियोगी, अनुयोगी इति सम्बन्धद्वयम् अङ्क्यते। यथा -

| (95) घटः न पटः अस्ति। | |
|---|---|
| 1. घटः कर्ता 4<br>2. न अनुयोगी 1<br>3. पटः प्रतियोगी 2<br>4. अस्ति |  |



**5.4.2 निषेध्यः**

| (96) अलम्  अलं बहु विकत्थ्य। | |
|---|---|
| 1 अलं वीप्सा 2<br>2 अलं<br>3 बहु क्रियाविशेषण 4<br>4 विकत्थ्य निषेध्यः 2 |  |



## 5.5 षष्ठीसम्बन्ध-शेषसम्बन्ध-सम्बन्धानां विषये किञ्चित् :

वयं त्रीन् भिन्नान् शब्दान् उपयुञ्ज्महे षष्ठीसम्बन्धः, शेषसम्बन्धः, सम्बन्धः इति। एतेषां कुत्र कस्य स्वीकारः इत्यस्मिन् विषये किञ्चिच्चर्चामहे :-

षष्ठ्यन्तपदानि चतुर्भिः सम्बन्धैः पदान्तरैः सह सम्बध्येरन् :

(a) कृदन्तेन सह कर्ता इति सम्बधेन। (दृष्टान्तः 2)

(b) कृदन्तेन सह कर्म इति सम्बन्धेन। (दृष्टान्तः 11)

(c) निर्धारणम् इति सम्बन्धेन। (दृष्टान्तः 44)

(d) अन्यत्र सर्वत्र सम्बन्धं षष्ठीसम्बन्धः इति नाम्ना अभिधास्यामः।

शेषसम्बन्धं तदा वदामः यदा सुबन्तपदयोः सम्बन्धः उपपदद्वारकः न भवति, किन्तु पाणिनीयसूत्रेण विशिष्टा काचन विभक्तिः विधीयते।

उपपदानां विषये यत्र एकः सम्बन्धः नामान्तरेण अभिधातुं शक्यः, तत्र सम्बन्धान्तरं 'सम्बन्धः' इति नाम्ना अभिधीयते। अव्ययानां सुबन्तैः सह सम्बन्धे क्रियमाणे

(1) यदि सम्बन्धः विद्यमाननामभिः अभिधातुं न शक्यते,

(2) तत्र च यदि सम्बन्धद्योतिका विभक्तिरपि काचिन्नास्ति,

(3) अव्ययं च स्वयमेव सम्बन्धं द्योतयति

तदा सम्बन्धः 'सम्बन्धः' इति नाम्ना अभिधीयते।

## 5.6 आन्तर्वाक्यसम्बन्धाः

यदा वाक्ये तिङन्ताः एकाधिकाः सन्ति, तदा तिङन्तघटितानि अनेकानि वाक्यानि त्रिभिः प्रकारैः परस्परं सम्बध्येरन् :

(a) किन्तु, परन्तु इत्यादिभिः योजकैः - ईदृशानि योजकानि परस्परनिरपेक्षं सम्पूर्णं (निराकाङ्क्षम्) वाक्यं योजयन्ति। अतः प्रथमवाक्यस्य समाप्तौ पूर्णविरामः दीयते, अपरं वाक्यं किन्तु इत्यनेन अथवा परन्तु इत्यनेन आरभ्यते, वयं तादृशं सम्बन्धं न अङ्कयामः। तस्मात् एते शब्दाः असम्बद्धाः पृथक्कृताः तिष्ठन्ति।

| (97) किन्तु सः पाठं न पठति। | |
|---|---|
| 1 किन्तु<br>2 सः कर्ता 5<br>3 पाठम् कर्म 5<br>4 न सम्बन्धः 5<br>4 पठति |  |

(b) कानिचन योजकानि युगलरूपेण प्रयुज्यन्ते, यथा : यदि-तर्हि, यद्यपि-तथापि, यतः-ततः /अतः , यावत्-तावत्। अत्र वाक्यद्वये सम्बन्धाः पार्थक्येन निर्णीयन्ते। ततः वाक्यद्वयगतयोः मुख्यक्रिययोः यदि-तर्हि इत्याभ्यां यथाक्रमं प्रतियोगी अनुयोगी इति सम्बन्धाभ्यां सम्बन्धं कुर्मः। यदि-तर्हि इत्येतौ परस्परं 'सम्बन्धः' इति सम्बन्धेन सम्बध्येते।

| (98) यदि त्वम् इच्छसि तर्हि अहं भवतःगृहम् आगमिष्यामि। | |
|---|---|
| 1 यदि सम्बन्धः 4<br>2 त्वम् कर्त्ता 3<br>3 इच्छसि प्रतियोगी 1<br>4 तर्हि अनुयोगी 8<br>5 अहं कर्त्ता 8<br>6 भवतः षष्ठीसम्बन्धः 7<br>7 गृहम् कर्म 8<br>8 आगमिष्यामि |  |

वाक्येऽस्मिन् मुख्यविशेष्यम् आगमिष्यामि इति अस्ति

<table>
<tr><td colspan="2">(99) यद्यपि अयं बहु प्रयासं कृतवान्  तथापि परीक्षा तु अनुत्तीर्णा अस्ति।</td></tr>
<tr><td>1 यद्यपि सम्बन्धः 6<br>2 अयं कर्त्ता 5<br>3 बहु विशेषणम्  4<br>4 प्रयासं कर्म 5<br>5 कृतवान्  प्रतियोगी 1<br>6 तथापि अनुयोगी 9<br>7 परीक्षा कर्म 9<br>8 तु सम्बन्धः 7<br>9 अनुत्तीर्णा(अस्ति)</td><td>
</td></tr>
</table>

<table>
<tr><td colspan="2">(100) यतः समये न आगतः आसीत्  ततः प्रवेशपरीक्षायां न अनुमतः अस्ति।</td></tr>
<tr><td>1 यतः सम्बन्ध 5<br>2 समये कालाधिकरण 4<br>3 न सम्बन्धः 4<br>4 आगतः(आसीत्) प्रतियोगी 1<br>5 ततः अनुयोगी 8<br>6 प्रवेशपरीक्षायां अधिकरण 8<br>7 न सम्बन्धः 8<br>8 अनुमतः(अस्ति)</td><td>
</td></tr>
</table>

बहुधा युगलयोः एकस्यैव प्रयोगः एकस्मिन्  वाक्ये दृश्यते, तदा वाक्यस्य विश्लेषणसमये वयम्  अप्रयुक्तं पदम्  अध्याहृत्य बन्धन्यां प्रदर्शयामः। यथा:  यदि तर्हि

यद्यपि तथापि

यतः ततः/अतः

यावत्  तावत्

| (101) त्वम्  इच्छसि तर्हि अहं भवतः गृहं आगमिष्यामि। | |
|---|---|
| 1 (यदि) सम्बन्धः 4<br>2 त्वम्  कर्त्ता 3<br>3 इच्छसि प्रतियोगी 1<br>4 तर्हि अनुयोगी 8<br>5 अहं कर्त्ता 8<br>6 भवतः षष्ठीसम्बन्धः 7<br>7 गृहम्  कर्म 8<br>8 आगमिष्यामि |  |

| (102) यदि त्वम्  इच्छसि अहं भवतः गृहं आगमिष्यामि। | |
|---|---|
| 1 यदि सम्बन्ध 4<br>2 त्वम्  कर्त्ता 3<br>3 इच्छसि प्रतियोगी 1<br>4 (तर्हि) अनुयोगी 8<br>5 अहं कर्त्ता 8<br>6 भवतः षष्ठीसम्बन्धः 7<br>7 गृहम्  कर्म 8<br>8 आगमिष्यामि |  |

| (103) अयं बहु प्रयासं कृतवान्  तथापि परीक्षा तु अनुत्तीर्णा। | |
|---|---|
| 1 (यद्यपि) सम्बन्धः 6<br>2 अयं कर्त्ता 5<br>3 बहु विशेषणम्  4<br>4 प्रयासं कर्म 5<br>5 कृतवान्  प्रतियोगी 1<br>6 तथापि अनुयोगी 6<br>7 परीक्षा कर्त्ता 9<br>8 तु सम्बन्धः 7<br>9 अनुत्तीर्णा(अस्ति) |  |

(104) समये न आगतः ततः प्रवेशपरीक्षायां न अनुमतः।

1 (यतः) सम्बन्ध 5
2 समये कालाधिकरण 4
3 न अभावप्रतियोगिकः 4
4 आगतः(आसीत्) प्रतियोगी 1
5 ततः अनुयोगी 8
6 प्रवेशपरीक्षायां अधिकरण 8
7 न अभावप्रतियोगिकः 8
8 अनुमतः(अस्ति)




(105) यतः समये न आगतः प्रवेशपरीक्षायां न अनुमतः।

1 यतः सम्बन्ध 5
2 समये कालाधिकरण 4
3 न अभावप्रतियोगिकः 4
4 आगतः(आसीत्) प्रतियोगी 1
5 (ततः) अनुयोगी 8
6 प्रवेशपरीक्षायां अधिकरण 8
7 न अभावप्रतियोगिकः 8
8 अनुमतः(अस्ति)




(106) समये न आगतः अतः प्रवेशपरीक्षायां न अनुमतः।

1 (यतः) सम्बन्ध 5
2 समये कालाधिकरण 4
3 न अभावप्रतियोगिकः 4
4 आगतः(आसीत्) प्रतियोगी 1
5 अतः अनुयोगी 8
6 प्रवेशपरीक्षायां अधिकरण 8
7 न अभावप्रतियोगिकः 8
8 अनुमतः(अस्ति)



(107) यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत्  अस्याः कृते जगत्  च अपि युक्तम्  इति एव मे मतिः अस्ति।

1 यदि सम्बन्धः 10

2 रामः कर्ता 5

3 समुद्रान्तां विशेषण 4

4 मेदिनीं पदसमुच्चयः

5 परिवर्तयेत्  प्रतियोगी 1

6 अस्याः षष्ठीसम्बन्धः7

7 कृते हेतुः 5

8 जगत्  पदसमुच्चयः 9

9 च कर्म 5

10 अपि अनुयोगी 11

11 युक्तम्  प्रतियोगी 12

12 इति अनुयोगी 15

13 एव सम्बन्ध 11

14 मे षष्ठीसम्बन्धः 17

15 मतिः कर्ता 17

16 अस्ति




(108) प्रथमम्  अहं श्रृणोमि अथ लिखामि।

1 प्रथमम्  क्रियाविशेषण 3

2 अहं कर्त्ता 3

3 श्रृणोमि

4 अथ अनुयोगी 3

5 लिखामि प्रतियोगी 4



<table>
<tr><th colspan="2">(109) मारीचः नाम राक्षसः आसीत्।</th></tr>
<tr><td>1 मारीचः प्रतियोगी 2<br>2 नाम अनुयोगी 3<br>3 राक्षसः कर्ता 4<br>4 आसीत्  3</td><td>
</td></tr>
</table>

<table>
<tr><th colspan="2">(110) गजेन्द्रः तीव्रप्रयत्नम्  अकरोत्  किन्तु नक्रग्रहात्  न मुक्तः।</th></tr>
<tr><td>1 गजेन्द्रः कर्त्ता 3<br>2 तीव्रप्रयत्नम्  कर्म 3<br>3 अकरोत्<br>4 किन्तु अनुयोगी 3<br>5 नक्रग्रहात्  अपादानम्  7<br>6 न अभावप्रतियोगिकः 7<br>7 मुक्तः(अभूत्) प्रतियोगी 4</td><td>
</td></tr>
</table>

<table>
<tr><th colspan="2">(111) त्वम्  इच्छति चेत्  अहं भवतः गृहं आगमिष्यामि।</th></tr>
<tr><td>1 त्वम्  कर्त्ता 2<br>2 इच्छसि अनुयोगी 3<br>3 चेत्  प्रतियोगी 7<br>4 अहं कर्त्ता 7<br>5 भवतः षष्ठीसम्बन्धः 6<br>6 गृहम्  कर्म 7<br>7 आगमिष्यामि</td><td>
</td></tr>
</table>

c) साम्बन्धिकसर्वनाम

यत्र वाक्येषु साम्बन्धिकसर्वनामानि प्रयुज्यन्ते, तत्र तानि सर्वनामानि यथा क्रियया सह सम्बध्यन्ते, तथैव परस्परमपि सम्बध्यन्ते। यथा : अस्मिन्  वाक्ये -- यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः

| (112) यत्र नार्यः तु पूज्यन्ते रमन्ते तत्र देवताः। | |
|---|---|
| 1 यत्र(i) अधिकरण 4<br>2 नार्यः कर्म 4<br>3 तु अवधारण 2<br>4 पूज्यन्ते<br>5 रमन्ते<br>6 तत्र(i) अधिकरण 5<br>7 देवताः कर्त्ता 5 |  |



अत्र वाक्यद्वयं वर्तते - 'यत्र नार्यस्तु पूज्यन्ते' इत्येकम् 'रमन्ते तत्र देवताः' इत्यपरम्। वाक्यद्वयमपि निराकाङ्क्षता सम्पूर्णम्, किन्तु यत् तत् इति सर्वनामद्वयं परस्परम् आकाङ्क्षते सम्बध्यते च। अयञ्च सम्बन्धः पूर्वोक्तेभ्यः सर्वेभ्यः सम्बन्धेभ्यः भिन्नः। अयं कश्चन अभेदः सम्बन्धः, यः प्रातिपदिकार्थेनैव द्योत्यते, प्रत्ययार्थेन न। एवमपि नियमितुं न शक्यते यत् यत्, तत् इति प्रातिपदिकद्वयात् समाना एव विभक्तिः स्यात्। अतः एतादृशशब्दयोः सम्बन्ध दर्शयितुं तयोः समानं चिह्नं किञ्चित् कल्पयामः, एवम् अनयोः मध्ये विशिष्टं सम्बन्धम् अनुक्त्वा वयं तयोः उभयोरपि i इति चिह्नं दास्यामः। यथा : यत्र (-i), तत्र (+i) दृश्यताम्, '+' इति चिह्नेन ज्ञायते यत् 'तत्र' इत्यस्य काचन आकाङ्क्षा वर्तते '-' इति चिह्नेन ज्ञायते यत् 'तत्र' इति ताम् आकाङ्क्षां पूरयति। यदि एकस्मिन्नेव वाक्ये एकाधिकानि साम्बन्धिकसर्वनामयुगलानि सन्ति तर्हि तेषां j, k इत्येवमादीनि अन्यानि चिह्नानि दास्यामः। यथा :

यदा युगलस्य एकं नास्ति तदा वयं प्रतिबन्धानां तत् प्रदर्शयामः

| (113) रामः यत्र गच्छति सीता अपि तत्र गच्छति। | |
|---|---|
| 1 रामः कर्ता 3<br>2 यत्र(i-) अधिकरणम् 3<br>3 गच्छति<br>4 सीता कर्ता 7<br>5 अपि सम्बन्धः 4<br>6 तत्र(i+) अधिकरणम् 7<br>7 गच्छति |  |

| (114) रामः यस्मात् अध्यापकात् यत् पुस्तकम् अपठत् अहं तस्मात् अध्यापकात् तत् पुस्तकम् अपठम्। | |
|---|---|
| 1 रामः कर्ता 6<br>2 यस्मात्(i-) विशेषणम् 3<br>3 अध्यापकात् अपादानम् 6<br>4 यत्(j-) विशेषणम् 5<br>5 पुस्तकम् कर्म 6<br>6 अपठत्<br>7 अहं कर्ता 12<br>8 तस्मात्(i+) विशेषणम् 9<br>9 अध्यापकात् अपादानम् 12<br>10 तत्(j+) विशेषणम् 11<br>11 पुस्तकम् कर्म 12<br>12 अपठम् |  |



| (92) यदा मेघः वर्षति तदा मयूरः नृत्यति। | |
|---|---|
| 1 यदा(i) कालाधिकरण 3<br>2 मेघः कर्त्ता 3<br>3 वर्षति<br>4 तदा(i)कालाधिकरण 6<br>5 मयूरः कर्त्ता 6<br>6 नृत्यति |  |



| (93) मयूरः नृत्यति यदा मेघः वर्षति। | |
|---|---|
| 1 (तदा)(i) अधिकरण 3<br>2 मयूरः कर्त्ता 3<br>3 नृत्यति<br>4 यदा(i) कालाधिकरण 6<br>5 मेघः कर्त्ता 6<br>6 वर्षति |  |

| (94) मेघः वर्षति तदा मयूरः नृत्यति। | |
|---|---|
| 1 (यदा)(i) कालाधिकरण 3<br>2 मेघः कर्त्ता 3<br>3 वर्षति<br>4 तदा(i)कालाधिकरण 6<br>5 मयूरः कर्त्ता 6<br>6 नृत्यति |  |

अग्रिमोदाहरणे यावत् तावत् इति अव्यययुगलं वर्तते।

| (95) यावत् अयं प्राणेन न वियुज्यते तावत् इमं गृहाण। | |
|---|---|
| 1 यावत् सम्बन्धः 5<br>2 अयम् कर्ता 5<br>3 प्राणेन सम्बन्धः 5<br>4 न सम्बन्धः 5<br>5 वियुज्यते<br>6 तावत् सम्बन्धः 8<br>7 इमं कर्म 8<br>8 गृहाण |  |

## 5.7 इतिहासः

कारकाणां निश्चयार्थम् ईदृशी योजना प्रथमं कं.वे.रामकृष्णमाचार्यैः प्रस्ताविता। इदञ्च तृतीयसंस्कृतसंगणकभाषाविज्ञानसङ्गोष्ठ्यां हैदराबादविश्वविद्यालये 2009 वर्षस्य जनवरीमासे शोधपत्ररूपेण प्रस्तुतम्। अस्य च अङ्कनसमूहस्य हिन्दीभाषायां अधुना विद्यमानेन अङ्कनसमूहेन सह तुलना कृता तथा सङ्क्षेपरामायणस्य सुन्दरकाण्डस्य पञ्चदश-षोडशसर्गयोः शतस्य वाक्यानां कारकनिश्चयः अपि कृतः।

अत्र कृतानां कार्याणां समीक्षणाय 2010 वर्षस्य जुलाई-मासस्य 24-26 दिनाङ्केषु, पुनः अक्टूबर-मासस्य 21-22 दिनाङ्कयोः विद्वांसः चर्चाम् अपि कृतवन्तः।

वयं प्रो॰ कं.वे.रामकृष्णमाचार्यमहोदयेभ्यः धन्यवादान् समर्पयामः। ते विविधस्तरेषु अस्य विवर्धनाय बहून् विषयान् योजितवन्तः।

अधःस्थिते कोष्ठके अत्र उपयुक्तानाम्  अङ्कनानां काचन सूची दीयते

| | | | |
|---|---|---|---|
| कर्ता | सम्बोधनसूचकम् | प्रयोजककर्ता | सम्बोध्य |
| प्रयोज्यकर्ता | प्रयोजनम् | मध्यस्थकर्ता | तादर्थ्यम् |
| कर्म | हेतुः | गौणकर्म | वीप्सा |
| मुख्यकर्म | क्रियाविशेषणम् | करणम् | षष्ठीसम्बन्धः |
| सम्प्रदानम् | निर्धारणम् | अपादानम् | शेषसम्बन्धः |
| अधिकरणम् | पूर्वकालः | देशाधिकरणम् | समानकालः |
| कालाधिकरणम् | अनन्तरकालः | विषयाधिकरणम् | विशेषणम् |
| उपपदसम्बन्धः | सम्बन्ध: | प्रतियोगी | अनुयोगी |
| निषेध्यः | कर्तृसमानाधिकरणम् | कर्मसमानाधिकरणम् | समुच्चितम् |
| समुच्चितम् | अन्यतरः | भावलक्षणसप्तमी-पूर्वकालः | भावलक्षणसप्तमी-अनन्तरकालः |
| भावलक्षणसप्तमी-समानकालः | लुप्तक्रियाकारकम् | विभक्तम् | |

एते सर्वे विशेषज्ञाः कारकविषयकाधिवेशने भागं गृहीतवन्तः

| | | |
|---|---|---|
| प्रो० रामकृष्णमाचार्यः | | प्रो० वीरनारायण पाण्डुरङ्गी |
| प्रो० सत्यनारायण मूर्ति | | प्रो० तिरुमल कुलकर्णी |
| प्रो० श्रीनिवास वरखेडी | | प्रो० राजधर मिश्र |
| प्रो० दीप्ति मिश्रा शर्मा | | प्रो० गिरीश नाथ झा |
| Prof. Gérard Huet | | डा० वरलक्ष्मी |
| डा० अम्बा कुलकर्णी | | डा० देवानन्द शुक्ल |
| आचार्य रामचन्द्र | | डा० शीतल पोकार |
| माधवाचार्य | | डा० आर० चन्द्रशेखर |
| श्री पवन कुमार | | श्री अनिल कुमार |
| सुश्री शिवजा | | डा० विभूति नाथ झा |
| श्रीमती प्रीति शुक्ला | | सुश्री मोनाली |
| सुश्री गायत्री | | आचार्य दीपक |
| श्री माधव गोपाल | | श्री नृपेन्द्र पाठक |
| श्री जगदीश | | श्री ललित |

वयं पुनः प्रो० राजीव संघल, प्रो० विनीत चैतन्य एवं प्रो०Prof. Gérard Huetएतान्  बहुमूल्यपरामर्शार्थं धन्यवादं समर्पयामः